**अपहारिन्** त्रि० अप+हृ–णिनि स्त्रियां ङीप् । १अपहर्त्तरि २अपनायके च "इन्द्रियाणां विचरतां विषयेष्वपहारिषु" इति मनुः "क्षेत्रदारापहारी च षड़ेते ह्याततायिन" इति मनुः

**अपहास** पु० अप+हस–घञ् । १ अकारणहास्ये हेमचन्द्रः ।

**अपह्नव** पु० अप+ह्नु–अप् । १सतोऽपि वस्तुनोऽसत्त्वेन कथनरूपेऽपलापे, । अपह्नवश्च द्विविधः शब्दतः अर्थतोवा "मिथ्यैतदिति शब्दतः, नाभिजानाम्यहं, तत्र तदा न मम स्थितिरित्येवमर्थतोऽपह्नव इति । २ प्रेम्णि च ।

**अपह्नुत** त्रि० अप+ह्नु–क्त । १ ज्ञातापहारे वस्तुनि यस्य चौर्य्यं कृतं तस्मिन्, २ स्थानान्तरं नीते, ३ अपसारिते च ।

**अपह्नुति** स्त्री अप+ह्नु–क्तिन् । १ अपह्नवे "प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिरिति" सा०द० उक्ते २ अर्थालङ्कारभेदे च । सा च द्विधा अपह्नवपूर्व्वकः अन्यारोपः, अन्यारोपपूर्व्वकः अपह्नवश्च यथा "नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः । नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः" ‖ "एतद्विभाति चरमाचलचूड़चुम्बि हिण्डीरपिण्डरुचिशीतमरीचिविम्बम् । उज्ज्वालितस्य रजनीं मदनानलस्य धूमं दधत्प्रकटलाञ्छनकैतवेन" ‖ "विराजते व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभङ्गाः" । इत्याद्याकारेण प्रकृतनिषेधो बोद्धव्यः । "गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन । यदि श्लेषेणान्यथा वाऽन्यथयेत् साप्यपह्नुतिः" सा०द० तत्र श्लेषेण यथा ‖ "काले वारिधराणामपतितया नैव शक्यते स्थातुम् । उत्कण्ठितासि तरले ! न हि न हि सखि ! पिच्छिलः पन्थाः" ‖ अत्रापतितयेत्यत्र पतिं विनेत्युक्त्वा पतनाभावेनेत्यन्यथाकृतम् । अश्लेषेण यथा । "इह पुरोऽनिलकम्पितविग्रहा मिलति का न वनस्पतिना लता । स्मरसि किं सखि ! कान्तरतोत्सवं ! न हि घनागमरीतिरुदाहृता" इति ‖

**अपह्नुवान** त्रि० अप+ह्नु–शानच् ।१चोरयति २अपनयति ३संगोपयति च "अपह्नुवानस्य जनाय यन्निजामिति" नैष०

**अपह्नूयमान** त्रि० अप+ह्नु–कर्म्मणि शानच् । १ अपनीयमाने २ स्थानान्तरमपसार्य्यमाणे ३ चौर्य्यमाणे च ।

**अपह्रियमाण** त्रि० अप+हृ–कर्म्मणि शानच् । १चौर्य्यमाणे । २ अपाकृष्यमाणे च ।

**अपांक्षय** पु० ६त० अलुक् स० । १ नेत्रे । अम्बुजलधरत्वात्तथात्वम् "अपांक्षये चक्षुषि, त्वां सादयामि "चक्षु र्वा अपांक्षय इति" श्रुतिः यजुर्वेददीपः । पदद्वयमित्येके ।

**अपांज्योतिस्** न० ६त० अलुक्स० । १ विद्युत्सु ता हि अप्सु क्षियन्ति "अपांज्योतिषि विद्युति त्वां सादयामि" "विद्युद्वा अपांज्योतिरिति" श्रुतिः वे०दी० पदद्वयमित्येके

**अपांनपात्** पु० न पातयति पत–णिच्–क्विप् न०त० "न भ्राण्नपादित्या०" पा० प्रकृतिभावः अलुक्स० । १ यज्ञदेवताभेदे । "अपोनपात् अपांनपाच्च देवतेति" सि०कौ० । "अपोनपाते अपांनपातेऽनुब्रूहीति" प्रैष्यः ।

**अपांनप्त्रि(प्त्री)य** त्रि० अपांनपात् देवताऽस्य घ,छ वा । १ अपांनपाद्देवताके हविरादौ ।

**अपांनाथ** पु० ६त० अलुक् स० । १ समुद्रे ।

**अपांनिधि** पु० निधीयतेऽस्मिन् नि+धा–आधारे कि ६त० अलुक्स० । १ समुद्रे, २ विष्णौ च "अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठित इति" विष्णुस० । "सरितामस्मि सागर" इति गीतोक्तेस्तस्य तथात्वम् । [ २ वरुणे च ।

**अपांपति** पु० पा–डति ६त० अलुक् स० । १ समुद्रे,

**अपांपाथस्** न० पाथः सारः ६त० अलुक्स० । १ अन्ने तस्य दृष्टिप्रभवत्वात्तथात्वम् "वृष्टेरन्नं ततः प्रजेति" गीतायां तथोक्तेः । "अपांपाथसि अन्ने त्वां सादयामि" "अन्नं वा अपांपाथ" इति श्रुतिः वे०दी० । पदद्वयमित्येके ।

**अपांपित्त** न० ६त० वा अलुक् स० । १ अग्नौ, तस्य जलहेतुत्वात् तत्पित्तत्वम् "आकाशाद्वायुर्वायोरग्निरग्नेराप" इति" श्रुतौ तस्य तथात्वावगतेः । वा लुकि अप्पित्तमप्यत्र ।

**अपांपुरीष** न० पुरीषं मलः ६त० अलुक्स० । १ सिकतासु, तासां जलमलरूपत्वात्तथात्वम् "अपांपुरीषे सिकतासु त्वां सादयामि "सिकता वा अपां पुरीषमिति श्रुतिः" वेददी०

**अपांयोनि** स्त्री६त० अलुक्समा० । १समुद्रे "अपांयोनौ समुद्रे" इति वेददी० "समुद्रोवै अपांयोनिरिति" शत० ब्रा० पदद्वयमित्येके ।

**अपांशु(सु)ला** स्त्री पांश(स)वोव्यभिचारदोषाः सन्ति यस्याः सिध्मा० लच् पांशु(सु)ला स्वैरिणी न०त० । १ पतिव्रतायां स्त्रियाम् "अपांशु(सु)लानां धुरि कीर्त्तनीयेति" रघुः ।

**अपांसदन** न० अलुक्स० । १ दिवि "दिवि ह्यापः सन्ना इति" शत०ब्रा० । भिन्नं पदमित्येके ।

**अपांसधस्थ** पु० ६त० अलुक्स० । १ अन्तरिक्षे "अपांसधस्थे अन्तरिक्षे" वेददी० "अन्तरिक्षं वा अपांसधस्थमिति" शत०ब्रा० । भिन्नं पदमित्येके ।

**अपांसधिस्** न० ६त० अलुक्स० । १ श्रोत्रे "अपांसधिषि श्रोत्रे" वेददी० । "श्रोत्रं वा अपांसधिरिति" शत०ब्रा० ।